अज्ञः The ignorant अश्रद्दधानः the man without *Śraddhā* संशयात्मा the doubting self विनश्यति goes to destruction संशयात्मनः of the doubting self अयं this लोकः world न not अस्ति is न not च and परः the next न not च and सुखं happiness.

40. The ignorant, the man without *Śraddhā*, the doubting self, goes to destruction. The doubting self has neither this world, nor the next, nor happiness.

The ignorant: one who knows not the Self.

The man without Śraddhā: one who has no faith in the words and teachings of his Guru.

The doubting self has etc.: One of a doubting disposition fails to enjoy this world, owing to his constantly rising suspicion about the people, and things around him, and is also full of doubt as regards the next world; so do the ignorant and the man without *Śraddhā*.

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ॥
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४१॥

धनञ्जय O Dhanañjaya योगसंन्यस्तकर्माणं one who has renounced work by Yoga ज्ञानसंछिन्नसंशयम् one whose

doubts are rent asunder by knowledge आत्मवन्तं poised in the Self कर्माणि action न not निबध्नन्ति bind.

41. With work renounced by Yoga and doubts rent asunder by knowledge, O Dhanañjaya, actions do not bind him who is poised in the Self.

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ।।४२।।

तस्मात् Therefore आत्मनः of the Self अज्ञानसंभूतं born of ignorance हृत्स्थं residing in the heart एनं this संशयं doubt ज्ञानासिना by the sword of knowledge छित्त्वा cutting योगम् Yoga आतिष्ठ take refuge in भारत O Bhārata उत्तिष्ठ arise.

42. Therefore cutting with the sword of knowledge, this doubt about the Self, born of ignorance, residing in thy heart, take refuge in Yoga. Arise, O Bhārata!

इति ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ।।

The end of chapter four, designated, *The Way of Renunciation of Action in Knowledge.*

॥ पञ्चमोऽध्यायः ॥

FIFTH CHAPTER

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ॥
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

अर्जुनः Arjuna उवाच said:

कृष्ण O Kṛṣṇa कर्मणां of actions संन्यासं renunciation पुनः again योगं performance च and शंससि commendest एतयोः of these two यत् which श्रेयः the better एकं one तत् that (एकं one) सुनिश्चितम् decisively मे to me ब्रूहि tell.

Arjuna said:

1. Renunciation of action, O Kṛṣṇa, thou commendest, and again, its performance. Which is the better one of these? Do thou tell me decisively.

In IV. 18, 19, 21, 22, 24, 32, 33, 37, and 41, the Lord has spoken of the renunciation of all actions; and in IV 42, He has exhorted Arjuna to engage in Yoga, in performance of action. Owing to the mutual opposition between the two, which makes it impossible for one man to resort to both of them at the same time, doubt arises in the mind of Arjuna, and hence the question as above.

Its Performance—"Yoga" in the text: Yoga here and in the following verses means Karma-Yoga.

श्रीभगवानुवाच ।
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ॥
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥

श्रीभगवान् The Blessed Lord उवाच said:

संन्यासः Renunciation कर्मयोगः performance of action च and उभौ both निःश्रेयसकरौ leading to freedom तयोः of those two तु but कर्मसंन्यासात् than renunciation of action कर्मयोगः performance of action विशिष्यते is superior.

The Blessed Lord said:

2. Both renunciation and performance of action lead to freedom: of these, performance of action is superior to the renunciation of action.

Performance of action—is superior to mere renunciation (that is unaccompanied with knowledge) in the case of the novice in the path of spirituality. See the sixth *śloka* of this chapter.

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ॥
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥३॥

यः Who न not द्वेष्टि dislikes न not कांक्षति likes सः he नित्यसंन्यासी constant *Sannyāsī* ज्ञेयः should be known महाबाहो O mighty-armed हि verily निर्द्वन्द्वः one free from

the pairs of opposites बन्धात् from bondage सुखं easily प्रमुच्यते is set free.

3. He should be known a constant *Sannyāsī*, who neither likes nor dislikes: for, free from the pairs of opposites, O mighty-armed, he is easily set free from bondage.

Constant Sannyāsī: he need not have taken *Sannyāsa* formally, but if he has the above frame of mind, he is a *Sannyāsī* for ever and aye.

Neither likes nor dislikes: Neither hates pain and the objects causing pain, nor desires pleasure and the objects causing pleasure, though engaged in action.

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ।।४।।

बालाः Children सांख्ययोगौ *Sāṅkhya* (knowledge) and performance of actions पृथक् distinct (इति this) प्रवदन्ति speak न not पण्डिताः the wise एकम् one अपि even सम्यक् truly आस्थितः established in उभयोः of both फलम् fruit विन्दते gains.

4. Children, not the wise, speak of knowledge and performance of action, as distinct. He who truly lives in one, gains the fruits of both.

Children: the ignorant people devoid of insight into the purpose of the *Śāstra*.

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ।।५।।

सांख्यैः By the *Jñānis* यत् which स्थानं plane प्राप्यते is reached योगैः by the *Karma-yogis* अपि even तत् that गम्यते is reached यः who सांख्यं knowledge च and योगं performance of action च and एकं one पश्यति sees सः he पश्यति sees.

5. The plane which is reached by the *Jñānis* is also reached by the *Karma-yogis*. He who sees knowledge and performance of actions as one alone sees.

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ।।६।।

महाबाहो O mighty-armed अयोगतः without performance of action संन्यासः renunciation of action आप्तुम् to attain दुःखम् hard तु but योगयुक्तः devoted to the path of action मुनिः a man of meditation न चिरेण quickly ब्रह्म to Brahman अधिगच्छति goes.

6. Renunciation of action, O mighty-armed, is hard to attain to without performance of action; the man of meditation, purified by devotion to action, quickly goes to Brahman.

It is not that renunciation of action based on knowledge is not superior to performance of action, but that the latter method is easier for a beginner, and qualifies him for the higher path, by purifying his mind. Hence it is the proper, and therefore the superior course, in *his* case.

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ॥
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

योगयुक्तः Devoted to the path of action विशुद्धात्मा a man of purified mind विजितात्मा one with the body conquered जितेन्द्रियः one whose senses are subdued सर्वभूतात्मभूतात्मा one who realises his self as the self in all beings कुर्वन् acting अपि though न not लिप्यते is tainted.

7. With the mind purified by devotion to performance of action, and the body conquered, and senses subdued, one who realises one's self, as the self in all beings, though acting, is not tainted.

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ॥
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्छ्वसन् ॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ॥
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥

युक्तः Centred (in the Self) तत्त्ववित् the knower of truth पश्यन् seeing शृण्वन् hearing स्पृशन् touching जिघ्रन्

smelling अश्नन् eating गच्छन् going स्वपन् sleeping श्वसन् breathing प्रलपन् speaking विसृजन् letting go गृह्णन् holding उन्मिषन् opening (the eyes) निमिषन् closing (the eyes) अपि though इन्द्रियाणि senses इन्द्रियार्थेषु amongst sense-objects वर्तन्ते move इति this धारयन् being convinced किञ्चित् anything एव at all न not करोमि (I) do इति this मन्येत should think.

8-9. The knower of Truth, (being) centred (in the Self) should think, "I do nothing at all" — though seeing, hearing, touching, smelling, eating, going, sleeping, breathing, speaking, letting go, holding, opening, and closing the eyes — convinced that it is the senses that move among sense objects.

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।।१०।।

यः Who ब्रह्मणि in Brahman आधाय resigning सङ्गं attachment त्यक्त्वा forsaking कर्माणि actions करोति does सः he अम्भसा by water पद्मपत्रम् lotus-leaf इव like पापेन by evil न not लिप्यते soiled.

10. He who does actions forsaking attachment, resigning them to Brahman, is not soiled by evil, like unto a lotus-leaf by water.

Evil: the results, good and bad, producing bondage.

कायेन मनसा बुद्धया केवलैरिन्द्रियैरपि ।।
योगिन: कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ।।११।।

योगिन: Devotees in the path of work सङ्गं attachment त्यक्त्वा forsaking आत्मशुद्धये for the purification of the heart केवलै: only कायेन by body मनसा by mind बुद्धया by intellect इन्द्रियै: by senses अपि even कर्म action कुर्वन्ति perform.

11. Devotees in the path of work perform action, only with body, mind, senses, and intellect, forsaking attachment, for the purification of the heart.

Only with etc.—without egotism or selfishness: it applies to body, mind, senses, and intellect.

युक्त: कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्त: कामकारेण फले सक्तो निबध्यते ।।१२।।

युक्त: The well-poised कर्मफलं fruit of action त्यक्त्वा forsaking नैष्ठिकीम् born of steadfastness शान्तिम् peace आप्नोति attains अयुक्त: the unbalanced कामकारेण led by desire फले in the fruit (of action) सक्त: (being) attached निबध्यते is bound.

12. The well-poised, forsaking the fruit of action, attains peace, born of steadfastness;

the unbalanced one, led by desire, is bound by being attached to the fruit (of action).

Born of steadfastness: Śaṅkara explains *Naiṣṭhikīm* as gradual perfection in the path of knowledge, having the following stages of development: (1) purity of heart, (2) gaining of knowledge, (3) renunciation of action, (4) steadiness in knowledge.

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ।।१३।।

वशी Subduer (of the senses) देही embodied soul मनसा by discrimination सर्वकर्माणि all actions संन्यस्य having renounced सुखं happily नवद्वारे in the nine-gated पुरे city न not एव verily कुर्वन् acting न not (एव verily) कारयन् causing (others) to act आस्ते rests.

13. The subduer (of the senses), having renounced all actions by discrimination rests happily in the city of the nine gates, neither acting, nor causing (others) to act.

All actions: 1. *Nitya* or obligatory—the performance of which does not produce any merit while the non-performance produces demerit. 2. *Naimittika*—those arising on the occurrence of some special events, as the birth of a son: these also are customary. 3. *Kāmya*—those intended for securing some special ends: these are only optional. 4. *Niṣiddha*—forbidden. He rests happily in the body (of nine organic openings), seeing inaction in action: just exhausting his *Prārabdha*–not relating or identifying himself with anything of the dual universe.

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ।।१४।।

प्रभुः The Lord लोकस्य for the world न neither कर्तृत्वं agency न nor कर्माणि actions न not कर्मफलसंयोगं union with the fruits of action सृजति creates तु but स्वभावः (Nature) universal ignorance प्रवर्तते leads to action.

14. Neither agency, nor actions does the Lord create for the world, nor (does He bring about) the union with the fruit of action. It is universal ignorance that does (it all).

नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः ।।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।।१५।।

विभुः Omnipresent कस्यचित् of anyone पापं demerit न not आदत्ते takes सुकृतं merit च एव and न not अज्ञानेन by ignorance ज्ञानं knowledge आवृतं enveloped तेन hence जन्तवः beings मुह्यन्ति get deluded.

15. The Omnipresent takes note of the merit or demerit of none. Knowledge is enveloped in ignorance, hence do beings get deluded.

In unmistakable words, Kṛṣṇa describes the position of *Iśvara*, or the Lord, in relation to the Universe, in these two verses.

He is all-blissful, all-perfect; even the shadow of a motive or relation in Him, would be contradictory to His nature. His mere

proximity to *Prakṛti* or Nature endues the latter with power and potency of causing all that is. *Jīva* is bound so long as it relates itself to, and identifies itself with, this Nature. When it ceases to do so, it attains freedom. The whole teaching of the Gītā, and therefore of the whole Hindu scripture, on this subject, is condensed in the above.

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥

तु But आत्मनः of Self ज्ञानेन by knowledge येषां whose तत् that अज्ञानं ignorance नाशितम् is destroyed तेषाम् their तत् that ज्ञानं knowledge परम् the Supreme (Brahman) आदित्यवत् like the sun प्रकाशयति reveals.

16. But whose ignorance is destroyed by the knowledge of Self—that knowledge of theirs, like the sun, reveals the Supreme (Brahman).

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

तद्बुद्धयः Those who have their intellect absorbed in That तदात्मानः those whose self is That तन्निष्ठाः those who are steadfast in That तत्परायणाः those whose consummation is That ज्ञाननिर्धूतकल्मषाः those whose impurities have been shaken off by knowledge अपुनरावृत्ति non-return गच्छन्ति attain.

17. Those who have their intellect absorbed in That, whose self is That, whose steadfastness is in That, whose consummation is That, their impurities cleansed by knowledge, they attain to non-return (*Mokṣa*).

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥

पण्डिताः The knowers of the Self एव verily विद्याविनयसंपन्ने in one endowed with learning and humility ब्राह्मणे in a Brāhmaṇa गवि in a cow हस्तिनि in an elephant शुनि in a dog च and श्वपाके in a pariah (lit. one who cooks or eats a dog) च and समदर्शिनः lookers with an equal eye (भवन्ति become).

18. The knowers of the Self look with an equal eye on a Brāhmaṇa endowed with learning and humility, a cow, an elephant, a dog, and a pariah.

Because they can see nothing but the Self. It makes no difference to the sun whether it be reflected in the Gangā, in wine, in a small pool, or in any unclean liquid: the same is the case with the Self. No *Upādhi* (or limiting adjunct) can attach to it.

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ॥
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

येषां Whose मनः mind साम्ये in evenness स्थितं fixed इह in this world एव verily तैः by them सर्गः (relative) existence जितः is conquered हि indeed ब्रह्म Brahman समं even निर्दोषं without imperfection तस्मात् therefore ते they ब्रह्मणि in Brahman स्थिताः are established.

19. (Relative) existence has been conquered by them, even in this world, whose mind rests in evenness, since Brahman is even and is without imperfection: therefore they indeed rest in Brahman.

Relative existence: All bondage as of birth, death, etc. All possibility of bondage is destroyed when the mind attains perfect evenness, which in other words means—becoming Brahman.

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ॥
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥

ब्रह्मवित् Knower of Brahman ब्रह्मणि in Brahman स्थितः established स्थिरबुद्धिः one with intellect steady असंमूढः undeluded प्रियं the pleasant प्राप्य receiving न not प्रहृष्येत् should rejoice अप्रियम् the unpleasant च and प्राप्य receiving न not उद्विजेत् should be troubled.

20. Resting in Brahman, with intellect steady, and without delusion, the knower of Brahman neither rejoiceth on receiving what is pleasant, nor grieveth on receiving what is unpleasant.

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ।।२१।।

बाह्यस्पर्शेषु In the contacts (of the senses) with the external objects असक्तात्मा one whose heart is unattached आत्मनि in the Self यत् what सुखम् joy विन्दति realises स: he ब्रह्मयोगयुक्तात्मा heart devoted to the meditation of Brahman अक्षयम् undecaying सुखम् happiness अश्नुते attains.

21. With the heart unattached to external objects, he realises the joy that is in the Self. With the heart devoted to the meditation of Brahman, he attains undecaying happiness.

Heart—Antaḥ-karaṇa.

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ।।२२।।

कौन्तेय O Kaunteya ये which हि verily संस्पर्शजा: contact-born भोगा: enjoyments ते they दुःखयोनय: generators of misery एव only आद्यन्तवन्त: with beginning and end बुध: the wise man तेषु in them न not रमते seeks pleasure.

22. Since enjoyments that are contact-born are parents of misery alone, and with beginning and end, O son of Kuntī, a wise man does not seek pleasure in them.

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ॥
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

यः Who शरीरविमोक्षणात् (abl.) liberation from the body प्राक् before कामक्रोधोद्भवं born of lust and anger वेगं impulse इह in this world एव verily सोढुं to withstand शक्नोति is able सः he युक्तः steadfast in Yoga सः he सुखी happy नरः man.

23. He who can withstand in this world, before the liberation from the body, the impulse arising from lust and anger, he is steadfast (in Yoga), he is a happy man.

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ॥
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

यः Who अन्तःसुखः one whose happiness is within अन्तरारामः one whose relaxation is within तथा again यः who अन्तर्ज्योतिः one whose light is within सः that योगी Yogī एव alone ब्रह्मभूतः becoming Brahman ब्रह्मनिर्वाणं bliss in Brahman, i.e., absolute freedom अधिगच्छति gains.

24. Whose happiness is within, whose relaxation is within, whose light is within, that Yogī alone, becoming Brahman, gains absolute freedom.

Within: In the Self.

Absolute Freedom: *Brahma-Nirvāṇa*. He attains *Mokṣa* while still living in the body.

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ।।२५।।

क्षीणकल्मषाः Those whose imperfections are exhausted छिन्नद्वैधाः those whose doubts are dispelled यतात्मानः those whose senses are controlled सर्वभूतहिते in the good of all beings रताः engaged ऋषयः *Ṛṣis* ब्रह्मनिर्वाणम् absolute freedom लभन्ते obtain.

25. With imperfections exhausted, doubts dispelled, senses controlled, engaged in the good of all beings, the *Ṛṣis* obtain absolute freedom.

Ṛṣis: Men of right vision and renunciation.

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ।।२६।।

कामक्रोधवियुक्तानां Of those who have been released from lust and anger यतचेतसाम् of those whose heart is controlled विदितात्मनाम् of those who have realised the Self यतीनां of the *Sannyāsins* अभितः both here and hereafter ब्रह्मनिर्वाणं absolute freedom वर्तते exists.

26. Released from lust and anger, the heart controlled, the Self realised, absolute

freedom is for such *Sannyāsins*, both here and hereafter.

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ॥
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

बाह्यान् External स्पर्शान् (contacts) objects बहिः outside कृत्वा shutting out चक्षुः eye च and भ्रुवोः of the (two) eyebrows अन्तरे in the middle एव thus नासाभ्यन्तरचारिणौ moving inside the nostrils प्राणापानौ currents of *Prāṇa* and *Apāna* समौ even कृत्वा having made यतेन्द्रियमनोबुद्धिः one who has controlled one's senses, mind, and intellect मोक्षपरायणः one to whom *Mokṣa* is the supreme goal विगतेच्छाभयक्रोधः freed from desire, fear, and anger यः who मुनिः man of meditation सः he सदा for ever मुक्तः free एव verily.

27-28. Shutting out external objects; steadying the eyes between the eyebrows; restricting the even currents of *Prāṇa* and *Apāna* inside the nostrils; the senses, mind, and intellect controlled; with *Mokṣa* as the supreme goal; freed from desire, fear, and anger: such a man of meditation is verily free for ever.

External objects: Sound and other sense-objects. External objects are shut out from the mind by not thinking of them. When the eyes are half-closed in meditation, the eye-balls remain fixed, and their gaze converges, as it were, between the eyerbows. *Prāṇa* is the outgoing breath, *Apāna* the incoming; the restriction described is effected by *Prāṇāyāma*.

These two verses are the aphorisms of which the following chapter is the commentary.

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।।२९।।

यज्ञतपसां Of *Yajñas* and asceticisms **भोक्तारं** dispenser **सर्वलोकमहेश्वरम्** Great Lord of all the worlds **सर्वभूतानां** of all beings **सुहृदं** friend **मां** Me **ज्ञात्वा** knowing **शान्तिम्** peace **ऋच्छति** attains.

29. Knowing Me as the dispenser of *Yajñas* and asceticisms, as the Great Lord of all worlds, as the friend of all beings, he attains Peace.

Dispenser: Both as author and goal, the Lord is the dispenser of the fruit of all actions.

Friend: Doer of good without expecting any return.

इति संन्यासयोगो नाम पञ्चमोऽध्यायः ।।

The end of the fifth chapter, designated, *The Way of Renunciation*.

॥ षष्ठोऽध्यायः ॥

SIXTH CHAPTER

श्रीभगवानुवाच ।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

यः Who कर्मफलं fruit of action अनाश्रितः not leaning to कार्यं bounden कर्म duty करोति performs सः he संन्यासी renouncer of action च and योगी of steadfast mind च and न not निरग्निः one without fire न not च and अक्रियः one without action.

The Blessed Lord said:

1. He who performs his bounden duty without leaning to the fruit of action—he is a renouncer of action as well as of steadfast mind: not he who is without fire, nor he who is without action.

Bounden duty: *Nityakarma*.

Renouncer of action as well as of steadfast mind: *Sannyāsī* and Yogī.

Without fire: He that has renounced actions enjoined by the Vedas, requiring fire as adjunct, e.g., *Agnihotra*.

Without action: He who has renounced actions which do not require fire as adjunct, such as austerities and meritorious acts like digging wells etc.

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ।।२।।

पाण्डव O Pāṇḍava यं which संन्यासम् renunciation इति this प्राहुः said तं that योगं devotion to action विद्धि know हि for असंन्यस्तसङ्कल्पः one who has not forsaken *Saṅkalpa* कश्चन anyone योगी a devotee to action न not भवति becomes.

2. Know that to be devotion to action, which is called renunciation, O Pāṇḍava, for none becomes a devotee to action without forsaking *Saṅkalpa*.

Saṅkalpa—is the working of the imaging faculty, forming fancies, making plans, and again brushing them aside conceiving future results, starting afresh on a new line, leading to different issues, and so on and so forth. No one can be a *Karma-Yogī* or a devotee to action, who makes plans and wishes for the fruit of action.

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।।
योगारूढस्य तस्यैव शमः कारणमुच्यते ।।३।।

योगं Concentration आरुरुक्षोः wishing to climb (i.e., to attain) मुनेः of the man of meditation कर्म work कारणम् means उच्यते is said योगारूढस्य of one who has

attained concentration तस्य his शमः inaction एव verily कारणम् way उच्यते is said.

3. For the man of meditation wishing to attain purification of heart leading to concentration, work is said to be the way: For him, when he has attained such (concentration), inaction is said to be the way.

Purification of the heart leading to concentration—Yoga. "For a *Brāhmaṇa* there is no wealth like unto (the eye of) oneness, (and) evenness, truth, refinement, steadiness, harmlessness, straightforwardness, *and gradual withdrawal from all action*"—*Mahābhārata*, Śānti-Parva, 175. 38.

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ॥
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥४॥

यदा When हि verily न neither इन्द्रियार्थेषु in sense-objects न not कर्मसु in actions अनुषज्जते is attached तदा then सर्वसङ्कल्पसंन्यासी renouncer of all *Saṅklapas* योगारूढः to have attained concentration उच्यते is said.

4. Verily, when there is no attachment, either to sense-objects, or to actions, having renounced all *Saṅkalpas*, then is one said to have attained concentration.

Attained concentration: *Yogārūḍha*.

Renouncer of all Saṅkalpas: "O desire, I know where thy root lies: thou art born of *Saṅkalpa*. I shall not think of

thee, and thou shalt cease to exist, together with thy root."
—*Mahābhārata*, Śānti-Parva, 177.25.

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।।५।।

आत्मना By self आत्मानं oneself उद्धरेत् should uplift न not (तु but) आत्मानम् oneself अवसादयेत् should drag down हि verily आत्मा self एव alone आत्मनः of onself बन्धुः friend आत्मा self एव verily आत्मनः of oneself रिपुः enemy.

5. A man should uplift himself by his own self, so let him not weaken this self. For this self is the friend of oneself, and this self is the enemy of oneself.

The self-conscious nature of man is here considered in two aspects as being both the object of spiritual uplift and the subject of spiritual uplift, the ego acted upon and the ego acting upon the former. This latter active principle or ego should be kept strong in its uplifting function, for it is apt to turn an enemy if it is not a friend; and the next verse explains the reason.

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ।।६।।

येन By whom आत्मना by oneself एव verily आत्मा self जितः is conquered तस्य his आत्मा self आत्मनः of oneself बन्धुः friend तु but अनात्मनः of unconquered self आत्मा self

एव verily शत्रुवत् like foe शत्रुत्वे in the position of a foe वर्तेत would remain.

6. The self (the active part of our nature) is the friend of the self, for him who has conquered himself by this self. But to the unconquered self, this self is inimical, (and behaves) like (an external) foe.

The self is the friend of one, in whom the aggregate of the body and the senses has been brought under control, and an enemy when such is not the case.

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ।।७।।

जितात्मनः Of the self-controlled प्रशान्तस्य the serene one परमात्मा the Supreme Self शीतोष्णसुखदुःखेषु in cold and heat, pleasure and pain तथा as also मानापमानयोः in honour and dishonour समाहितः is steadfast.

7. To the self-controlled and serene, the Supreme Self is the object of constant realisation, in cold and heat, pleasure and pain, as well as in honour and dishonour.

Hence he remains unruffled in pleasant and adverse environments.

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ।।८।।

ज्ञानविज्ञानतृप्तात्मा One whose heart is satisfied by wisdom and realisation कूटस्थ: unshaken विजितेन्द्रिय: who has conquered his senses समलोष्टाश्मकाञ्चन: one to whom a lump of earth, stone, and gold are the same योगी Yogī युक्त: steadfast इति this उच्यते is said.

8. Whose heart is filled with satisfaction by wisdom and realisation, and is changeless, whose senses are conquered, and to whom a lump of earth, stone, and gold are the same: that Yogī is called steadfast.

Wisdom—Jñāna: knowledge of *Śāstras*.

Realisation—Vijñāna: one's own experience of the teachings of *Śāstras*.

Changeless—like the anvil. Things are hammered and shaped on the anvil, but the anvil remains unchanged: in the same manner he is called *Kūṭastha*—whose heart remains unchanged though objects are present.

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ।।९।।

सुहृत् Well-wisher मित्र: friend अरि: foe उदासीन: the neutral मध्यस्थ: the arbiter द्वेष्य: the hateful बन्धु: relative (सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु in well-wishers, etc.) साधुषु in the righteous अपि even च and पापेषु in the unrighteous समबुद्धि: one whose mind is even विशिष्यते attains excellence.

9. He attains excellence who looks with equal regard upon well-wishers, friends, foes, neutrals, arbiters, the hateful, the relatives, and upon the righteous and the unrighteous alike.

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ।।१०।।

योगी Yogī सततम् constantly रहसि in solitude स्थितः remaining एकाकी alone यतचित्तात्मा one with body and mind controlled निराशीः free from hope अपरिग्रहः free from possession आत्मानं युञ्जीत should practise concentration of the heart.

10. The Yogī should constantly practise concentration of the heart, retiring into solitude, alone, with the mind and body subdued, and free from hope and possession.

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ।।११।।

शुचौ In a cleanly देशे spot आत्मनः one's own स्थिरम् firm न not अत्युच्छ्रितं too high न not अतिनीचं too low चैलाजिनकुशोत्तरम् a cloth, a skin, and Kuśa-grass, arranged in consecution आसनं seat प्रतिष्ठाप्य having established.

11. Having established in a cleanly spot his seat, firm, neither too high nor too low, made of a cloth, a skin, and *Kuśa*-grass, arranged in consecution.

Arranged in consecution: that is—the *Kuśa*-grass arranged on the ground; above that, a tiger or a deer skin, covered by a cloth.

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ।।१२।।

तत्र There आसने on the seat उपविश्य sitting मनः mind एकाग्रं one-pointed कृत्वा making यतचित्तेन्द्रियक्रियः one who has subdued the action of mind and senses आत्मविशुद्धये for the purification of the heart योगम् Yoga युञ्ज्यात् should practise.

12. There, seated on that seat, making the mind one-pointed and subduing the action of the imaging faculty and the senses, let him practise Yoga for the purification of the heart.

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।।१३।।

कायशिरोग्रीवं Body, head, and neck समं erect अचलं still धारयन् holding स्थिरः (being) firm स्वं one's own नासिकाग्रं tip of the nose संप्रेक्ष्य gazing at दिशः directions च and अनवलोकयन् not looking.

13. Let him firmly hold his body, head, and neck erect and still, (with the eye-balls fixed, as if) gazing at the tip of his nose, and not looking around.

Gazing at the tip of his nose—could not be literally meant here, because then the mind would be fixed only there, and not on the Self: when the eyes are half-closed in meditation, and the eye-balls are still, the gaze is directed, *as it were*, on the tip of the nose.

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ।।१४।।

प्रशान्तात्मा Serene-hearted विगतभीः fearless ब्रह्मचारिव्रते in the vow of a *Brahmacāri* स्थितः established मनः mind संयम्य controlling मच्चित्तः thinking of Me मत्परः having Me as the supreme goal युक्तः steadfast आसीत should sit.

14. With the heart serene and fearless, firm in the vow of a *Brahmacāri*, with the mind controlled, and ever thinking of Me, let him sit (in Yoga) having Me as his supreme goal.

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ।।१५।।

एवं Thus सदा always आत्मानं mind युञ्जन् keeping steadfast नियतमानसः one with subdued mind योगी Yogi

निर्वाणपरमां that which culminates in *Nirvāṇa* (*Mokṣa*) मत्संस्थाम् residing in Me शान्तिं peace अधिगच्छति attains.

15. Thus always keeping the mind steadfast, the Yogī of subdued mind attains the peace residing in Me—the peace which culminates in *Nirvāṇa (Mokṣa)*.

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ॥
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

अर्जुन O Arjuna अत्यश्नतः of one who eats too much तु indeed न not योगः Yoga अस्ति is न not च and एकान्तम् at all अनश्नतः of one who does not eat न not च and अतिस्वप्नशीलस्य of one who sleeps too much न not च and एव verily जाग्रतः of the wakeful.

16. (Success in) Yoga is not for him who eats too much or too little—nor, O Arjuna, for him who sleeps too much or too little.

The Yoga-*śāstra* prescribes: "Half (the stomach) for food and condiments, the third (quarter) for water, and the fourth should be reserved for free motion of air".

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥

युक्ताहारविहारस्य Of one who is moderate in eating and recreation (such as walking, etc.) कर्मसु in actions युक्तचेष्टस्य of one who is moderate in effort (for work)

युक्तस्वप्नावबोधस्य of one who is moderate in sleep and wakefulness दुःखहा destructive of misery योगः Yoga भवति becomes.

17. To him who is temperate in eating and recreation, in his effort for work, and in sleep and wakefulness, Yoga becomes the destroyer of misery.

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ॥
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥

यदा When विनियतं completely controlled चित्तम् mind आत्मनि in the Self एव verily अवतिष्ठते rests तदा then सर्वकामेभ्यः from all desires निःस्पृहः free from longing steadfast इति this उच्यते is said.

18. When the completely controlled mind rests serenely in the Self alone, free from longing after all desires, then is one called steadfast (in the Self).

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ॥
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥

यथा As निवातस्थः placed in a windless spot दीपः lamp न not इङ्गते flickers आत्मनः of the Self योगम् concentration युञ्जतः of the practising one यतचित्तस्य of one with subdued mind योगिनः of the Yogi सा that उपमा simile स्मृता is thought.

19. "As a lamp in a spot sheltered from the wind does not flicker"—even such has been the simile used for a Yogī of subdued mind, practising concentration in the Self.

यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥२०॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ॥
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥२१॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ॥
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥२३॥

यत्र In which state योगसेवया by the practice of concentration निरुद्धं absolutely restrained चित्तं mind उपरमते attains quietude यत्र in which state च and आत्मना by self आत्मानं the Self पश्यन् seeing आत्मनि in the Self एव alone तुष्यति is satisfied.

(यत्र Where) अयं this यत्तत् that which आत्यन्तिकम् infinite बुद्धिग्राह्यम् perceived by the intellect अतीन्द्रियम् transcending the senses सुखम् bliss वेत्ति knows यत्र where च and स्थितः established तत्त्वतः from one's real state न एव never चलति departs.

यं Which च and लब्ध्वा having obtained ततः from that अधिकं superior अपरं other लाभं acquisition न not मन्यते regards यस्मिन् in which स्थितः established गुरुणा by great दुःखेन sorrow अपि even न not विचाल्यते is moved.

तं That दुःखसंयोगवियोगं a state of severance from the contact of pain योगसंज्ञितम् called by the name of Yoga विद्यात् should know अनिर्विण्णचेतसा with undepressed heart सः that योगः Yoga निश्चयेन with perseverance योक्तव्यः should be practised.

20-23. When the mind, absolutely restrained by the practice of concentration, attains quietude, and when seeing the Self by the self, one is satisfied in his own Self; when he feels that infinite bliss—which is perceived by the (purified) intellect and which transcends the senses, and established wherein he never departs from his real state; and having obtained which, regards no other acquisition superior to that, and where established, he is not moved even by heavy sorrow; let that be known as the state, called by the name of Yoga —a state of severance from the contact of pain. This Yoga should be practised with perseverance, undisturbed by depression of heart.

Which is perceived . . . intellect: Which the purified intellect can grasp independently of the senses. When in meditation the

mind is deeply concentrated, the senses do not function and are resolved into their cause—that is, the mind; and when the latter is steady, so that there is only the intellect functioning, or in other words, cognition only exists, the indescribable Self is realised.

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ।।२४।।

संकल्पप्रभवान् Born of *Saṅkalpa* सर्वान् all कामान् desires अशेषतः without reserve त्यक्त्वा abandoning मनसा by the mind एव alone समन्ततः from all sides इन्द्रियग्रामं group of senses विनियम्य completely restraining.

24. Abandoning without reserve all desires born of *Saṅkalpa,* and completely restraining, by the mind alone, the whole group of senses from their objects in all directions;

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ।।२५।।

धृतिगृहीतया Set in patience बुद्ध्या by the intellect मनः mind आत्मसंस्थं placed in the Self कृत्वा making शनैः शनैः by degrees उपरमेत् should attain quietude न not किञ्चित् anything अपि even चिन्तयेत् should think.

25. With the intellect set in patience, with the mind fastened on the Self, let him attain quietude by degrees: let him not think of anything.

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ॥
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

चञ्चलम् Restless अस्थिरम् unsteady मनः mind यतः यतः from whatever (reason) निश्चरति wanders away ततः ततः from that एतत् this (मनः mind) नियम्य curbing आत्मनि in the Self एव alone वशं subjugation नयेत् should bring.

26. Through whatever reason the restless, unsteady mind wanders away, let him, curbing it from that, bring it under the subjugation of the Self alone.

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ॥
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

प्रशान्तमनसं One of perfectly tranquil mind शान्तरजसं one whose passions are quieted अकल्मषम् one who is free from taint ब्रह्मभूतम् Brahman-become एनं this योगिनं Yogī हि verily उत्तमम् supreme सुखम् bliss उपैति comes.

27. Verily, the supreme bliss comes to that Yogī of perfectly tranquil mind, with passions quieted, Brahman-become, and freed from taint.

Brahman-become: i.e., one who has realised that all is Brahman.

Taint—of good and evil.

6

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ।।२८।।

एवं Thus सदा constantly आत्मानं mind युञ्जन् engaging विगतकल्मषः free from taint योगी Yogī सुखेन easily ब्रह्मसंस्पर्शम् generated by the contact with Brahman अत्यन्तं intense सुखम् bliss अश्नुते attains.

28. The Yogī, freed from taint (of good and evil), constantly engaging the mind thus, with ease attains the infinite bliss of contact with Brahman.

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ।।२९।।

योगयुक्तात्मा One whose heart is steadfast in Yoga सर्वत्र everywhere समदर्शनः one who sees the same आत्मानं Self सर्वभूतस्थम् abiding in all beings सर्वभूतानि all beings च and आत्मनि in the Self ईक्षते sees.

29. With the heart concentrated by Yoga, with the eye of evenness for all things, he beholds the Self in all beings and all beings in the Self.

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।।३०।।

यः Who मां Me सर्वत्र everywhere पश्यति sees मयि in Me च and सर्वं everything पश्यति sees तस्य his (to him) अहं I न not प्रणश्यामि vanish सः he च and मे My (to Me) न not प्रणश्यति vanishes.

30. He who sees Me in all things and sees all things in Me, he never becomes separated from Me, nor do I become separated from him.

Separated: i.e., by time, space, or anything intervening.

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥३१॥

यः Who सर्वभूतस्थितं dwelling in all beings मां Me एकत्वम् unity आस्थितः established भजति worships सर्वथा in every way वर्तमानः remaining अपि even सः that योगी Yogi मयि in Me वर्तते abides.

31. He who being established in unity, worships me, who am dwelling in all beings, whatever his mode of life, that Yogī abides in Me.

Worships Me: Realises Me as the Self of all.

Established in unity: i.e., having resolved all duality in the underlying unity.

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥

अर्जुन O Arjuna यः who सर्वत्र everywhere सुखं pleasure वा or यदि if वा or दुःखं pain आत्मौपम्येन by comparison with himself समं the same पश्यति sees सः that योगी Yogī परमः highest मतः is regarded.

32. He who judges of pleasure or pain everywhere, by the same standard as he applies to himself, that Yogī, O Arjuna, is regarded as the highest.

Seeing that whatever is pleasure or pain to himself, is alike pleasure or pain to all beings, he, the highest of Yogis, wishes good to all and evil to none—he is always harmless and compassionate to all creatures.

अर्जुन उवाच ।

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।।
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्
।।३३।।

अर्जुनः Arjuna उवाच said:

मधुसूदन O slayer of Madhu त्वया by Thee साम्येन by unity or evenness यः which अयं this योगः Yoga प्रोक्तः said एतस्य its स्थिराम् lasting स्थितिं endurance चञ्चलत्वात् from restlessness अहं I न not पश्यामि see.

Arjuna said:

33. This Yoga which has been taught by thee, O slayer of Madhu, as characterised by evenness, I do not see (the possibility of)

its lasting endurance, owing to restlessness (of the mind).

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ॥
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥३४॥

कृष्ण O Kṛṣṇa हि verily मनः mind चञ्चलं restless प्रमाथि turbulent बलवत् strong दृढम् unyielding अहं I तस्य of that निग्रहं control वायोः of the wind इव like सुदुष्करम् difficult to do मन्ये regard.

34. Verily, the mind, O Kṛṣṇa, is restless, turbulent, strong, and unyielding; I regard it quite as hard to achieve its control, as that of the wind.

"*Kṛṣṇa*", is derived from "Kṛṣ", to scrape: Kṛṣṇa is so called because He scrapes or draws away all sins and other evils from His devotees.

श्रीभगवानुवाच ।
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ॥
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥३५॥

श्रीभगवान् The Blessed Lord उवाच said:

महाबाहो O mighty-armed मनः mind दुर्निग्रहं difficult of control चलम् restless असंशयं undoubtedly तु but कौन्तेय O son of Kuntī अभ्यासेन by practice वैराग्येण by renunciation च and गृह्यते is restrained.

The Blessed Lord said:

35. Without doubt, O mighty-armed, the mind is restless, and difficult to control; but through practice and renunciation, O son of Kuntī, it may be governed.

Cf. Patañjali's *Yoga-Sūtras*, I. 12.

Practice: Earnest and repeated attempt to make the mind steady in its unmodified state of Pure Intelligence, by means of constant meditation upon the Chosen Ideal.

Renunciation: Freedom from desire for any pleasures, seen or unseen, achieved by a constant perception of evil in them.

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ।।३६।।

असंयतात्मना By a man of uncontrolled self योगः Yoga दुष्प्रापः hard to attain इति this मे My मतिः conviction वश्यात्मना by the self-controlled one तु but उपायतः by right means यतता by the striving one अवाप्तुम् to obtain शक्यः possible.

36. Yoga is hard to be attained by one of uncontrolled self: such is my conviction; but the self-controlled, striving by right means can obtain it.

अर्जुन उवाच ।
अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ।।३७।।

अर्जुन: Arjuna उवाच said:

कृष्ण Kṛṣṇa श्रद्धया by *Śraddhā* उपेत: possessed अयति: uncontrolled योगात् from Yoga चलितमानस: one whose mind wanders away योगसंसिद्धिं perfection in Yoga अप्राप्य not gaining कां which गतिं end गच्छति meets.

Arjuna said:

37. Though possessed of *Śraddhā* but unable to control himself, with the mind wandering away from Yoga, what end does one, failing to gain perfection in Yoga, meet, O Kṛṣṇa?

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ।।३८।।

महाबाहो O mighty-armed ब्रह्मण: of Brahman पथि in the path विमूढ: deluded अप्रतिष्ठ: supportless उभयविभ्रष्ट: fallen from both छिन्न- rent अभ्रम् cloud इव like न not नश्यति perishes कच्चित् particle implying question.

38. Does he not, fallen from both, perish, without support, like a rent cloud, O mighty-armed, deluded in the path of Brahman?

Fallen from both: That is, from both the paths of knowledge and action.

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ।।३९।।

कृष्ण O Kṛṣṇa मे my एतत् this संशयं doubt अशेषत: completely छेत्तुम् to dispel अर्हसि art justified त्वदन्य: but Thee अस्य of this संशयस्य doubt छेत्ता dispeller न not हि verily उपपद्यते is fit.

39. This doubt of mine, O Kṛṣṇa, Thou shouldst completely dispel; for it is not possible for any but Thee to dispel this doubt.

Since there can be no better teacher than the Omniscient Lord.

श्रीभगवानुवाच ।
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥
नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥४०॥

श्रीभगवान् The Blessed Lord उवाच said:

पार्थ O son of Pṛthā न not एव verily इह here न not अमुत्र hereafter तस्य his विनाश: destruction विद्यते is तात O my son हि verily कल्याणकृत् doer of good कश्चित् any दुर्गतिं bad state, hence grief न not गच्छति goes.

The Blessed Lord said:

40. Verily, O son of Pṛthā, there is destruction for him, neither here nor hereafter for, the doer of good, O my son, never comes to grief.

Tāta—son. A disciple is looked upon as a son; Arjuna is thus addressed as he had placed himself in the position of a disciple to Kṛṣṇa.

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।।४१।।

योगभ्रष्टः One fallen from Yoga पुण्यकृतां of the righteous लोकान् worlds प्राप्य having attained शाश्वतीः eternal समाः years उषित्वा having dwelt शुचीनां of the pure श्रीमतां of the prosperous गेहे in the home अभिजायते reincarnates.

41. Having attained to the worlds of the righteous, and dwelling there for everlasting years, one fallen from Yoga reincarnates in the home of the pure and the prosperous.

Everlasting years—meaning not absolutely, but a very long period.

अथवा योगिनामेव कुले भवति धीमताम् ।।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ।।४२।।

अथवा Or धीमताम् of the wise योगिनाम् of the Yogis एव verily कुले in the family भवति is born ईदृशम् such यत् which जन्म birth एतत् this हि verily लोके in the world दुर्लभतरं very rare to obtain.

42. Or else he is born into a family of wise Yogis only; verily, a birth such as that is very rare to obtain in this world.

Very rare—more difficult than the one mentioned in the preceding *Śloka*.

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ।।४३।।

तत्र There पौर्वदेहिकम् acquired in his former body that बुद्धिसंयोगं union with intelligence लभते gains कुरुनन्दन O son of the Kurus च and ततः than that भूयः more संसिद्धौ for perfection यतते strives.

43. There he is united with the intelligence acquired in his former body, and strives more than before, for perfection, O son of the Kurus.

Intelligence—Saṁskāra: store of experience in the shape of impressions and habits.

Strives... perfection: Strives more strenuously to attain to higher planes of realisation than those acquired in his former birth.

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ।।४४।।

तेन By that एव verily पूर्वाभ्यासेन previous practice अवशः helpless अपि even सः he ह्रियते is borne योगस्य of Yoga जिज्ञासुः enquirer अपि even शब्दब्रह्म Word-Brahman अतिवर्तते goes beyond.

The three worlds: *Bhūḥ* (the Earth), *Bhuvaḥ* (the Mid-Region), and *Svaḥ* (the Heaven).

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।१८।।

यस्मात् As अहम् I क्षरम् the Perishable अतीत: transcend अक्षरात् than (to) the Imperishable अपि even उत्तम: superior च and अत: therefore लोके in the world वेदे in the Veda च and पुरुषोत्तम: Puruṣottama (the Highest *Puruṣa*) इति as प्रथित: celebrated अस्मि am I.

18. As I transcend the Perishable and am above even the Imperishable, therefore am I in the world and in the Veda celebrated as Puruṣottama, (the Highest *Puruṣa*).

The Perishable: The Tree of *Saṁsāra* called *Aśvattha*.

The Imperishable: Which constitutes the seed of the Tree of *Saṁsāra*.

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।।
स सर्वविद्भजति मां सर्वभावेन भारत ।।१९।।

भारत O descendant of Bharata यः who एवम् thus असम्मूढः free from delusion पुरुषोत्तमम् the Supreme *Puruṣa* माम् Me जानाति knows सः he सर्ववित् knowing all सर्वभावेन with all his heart मां Me भजति worships.

19. He who, free from delusion, thus knows Me, the Highest Spirit, he knowing all, worships Me with all his heart, O descendant of Bharata.

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ।।२०।।

अनघ O sinless one भारत O descendant of Bharata इति thus गुह्यतमं most profound इदम् this शास्त्रम् teaching मया by Me उक्तं has been imparted एतत् this बुद्ध्वा knowing बुद्धिमान् possessed of (the highest) intelligence कृतकृत्यः (who has) accomplished all the duties च and स्यात् becomes.

20. Thus, O sinless one, has this most profound teaching been imparted by Me. Knowing this one attains the highest intelli-

gence and will have accomplished all one's duties, O descendant of Bharata.

Highest intelligence: 'which realises the Brahman.

Will have accomplished . . . duties: Whatever duty one has to do in life, all that duty has been done, when the Brahman is realised.

इति पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥

The end of the fifteenth chapter, designated, *The Way to the Supreme Spirit*.

।। षोडशोऽध्यायः ।।

SIXTEENTH CHAPTER

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।।१।।

श्रीभगवान् The Blessed Lord उवाच said:

अभयं Fearlessness सत्त्वसंशुद्धिः purity of heart ज्ञानयोग-व्यवस्थितिः steadfastness in knowledge and Yoga दानं almsgiving दमः control of the senses यज्ञः *Yajña* स्वाध्यायः reading of the *Śāstras* तपः austerity आर्जवम् uprightness;

The Blessed Lord said:

1. Fearlessness, purity of heart, steadfastness in knowledge and Yoga; almsgiving, control of the senses, *Yajña*, reading of the *Śāstras*, austerity, uprightness;

Yoga: consists in making what has been learnt from the *Śāstras* and the *Ācārya* an object of one's own direct perception, by concentration and self-control.

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।।२।।

अहिंसा Non-injury सत्यम् truth अक्रोधः absence of anger त्यागः renunciation शान्तिः tranquillity अपैशुनम् absence of calumny भूतेषु to beings दया compassion अलोलुप्त्वं uncovetousness मार्दवं gentleness ह्रीः modesty अचापलम् absence of fickleness;

2. Non-injury, truth, absence of anger, renunciation, tranquillity, absence of calumny, compassion to beings, uncovetousness, gentleness, modesty, absence of fickleness;

Uncovetousness: Unaffectedness of the senses when in contact with their objects.

Absence of fickleness: Avoidance of useless actions—Śrīdhara.

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥३॥

तेजः Boldness क्षमा forgiveness धृतिः fortitude शौचम् purity अद्रोहः absence of hatred नातिमानिता absence of pride दैवीम् divine सम्पदं state अभिजातस्य to one born for भवन्ति (these) belong भारत O descendant of Bharata.

3. Boldness, forgiveness, fortitude, purity, absence of hatred, absence of pride; these belong to one born for a divine state, O descendant of Bharata.

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ।।४।।

पार्थ O Pārtha दम्भः ostentation दर्पः arrogance च and अभिमानः self-conceit क्रोधः anger पारुष्यम् harshness च and अज्ञानं ignorance च एव as well as आसुरीम् an *Āsurika* सम्पदम् state अभिजातस्य to one who is born for.

4. Ostentation, arrogance, and self-conceit, anger as also harshness and ignorance, belong to one who is born, O Pārtha, for an *Āsurika* state.

Āsurika: Demoniac.

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ।।५।।

दैवी The divine सम्पत् state विमोक्षाय for liberation आसुरी *Āsurika* निबन्धाय for bondage मता is deemed (as mature) पाण्डव O Pāṇḍava मा not शुचः grieve दैवीम् the divine सम्पदं state अभिजातः born for असि (thou) art.

5. The divine state is deemed to make for liberation, the *Āsurika* for bondage; grieve not O Pāṇḍava, thou art born for a divine state.

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ।।६।।

पार्थ O Pārtha अस्मिन् लोके in this world दैव: the divine आसुर: the *Āsurika* च and द्वौ two भूतसर्गौ types of beings दैव: the divine विस्तरश: at length प्रोक्त: has been described आसुरं of the *Āsurika* मे from Me शृणु hear.

6. There are two types of beings in this world, the divine and the *Āsurika*. The divine have been described at length; hear from Me, O Pārtha, of the *Āsurika*.

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ।।७।।

आसुरा: The *Āsurika* जना: persons प्रवृत्तिं what to do च and निवृत्तिं what to refrain from न not विदु: know तेषु in them न neither शौचं purity न nor आचार: good conduct न च nor सत्यं truth विद्यते is.

7. The persons of *Āsurika* nature know not what to do and what to refrain from; neither is purity found in them nor good conduct, nor truth.

What to do . . . from: What acts they should perform to achieve the end of man, nor what acts they should abstain from to avert evil.

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ।।८।।

जगत् The universe असत्यम् (is) without truth अप्रतिष्ठं without (moral) basis अनीश्वरम् without a God अपरस्परसम्भूतं brought about by mutual union किमन्यत् what else कामहैतुकम् with lust for its cause ते आहु: they say.

8. They say, "The universe is without truth, without a (moral) basis, without a God, brought about by mutual union, with lust for its cause; what else?"

Without truth: As we are unreal so this universe is unreal, and the sacred scriptures that declare the truth are unreal.

What else: but lust can be the cause of the universe?—This is the view of the *Lokāyatikas*, the materialists.

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धय: ।।
प्रभवन्त्युग्रकर्माण: क्षयाय जगतोऽहिता: ।।९।।

अल्पबुद्धय: Of small intellect एतां this दृष्टिम् view अवष्टभ्य holding नष्टात्मान: ruined souls उग्रकर्माण: of fierce deeds अहिता: the enemies जगत: of the world क्षयाय for (its) destruction प्रभवन्ति rise.

9. Holding this view, these ruined souls of small intellect and fierce deeds, rise as the enemies of the world for its destruction.

Small intellect: as it concerns itself only with sense-objects and cannot soar higher.

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ॥
मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥१०॥

दुष्पूरं Insatiable कामम् desire आश्रित्य abiding in दम्भमानमदान्विताः full of hypocrisy, pride, and arrogance मोहात् through delusion असद्ग्राहान् evil ideas गृहीत्वा holding अशुचिव्रताः with impure resolve प्रवर्तन्ते they work.

10. Filled with insatiable desires, full of hypocrisy, pride, and arrogance, holding evil ideas through delusion, they work with impure resolve.

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ॥
कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥

प्रलयान्ताम् Ending only with death अपरिमेयां immense चिन्ताम् cares उपाश्रिताः beset with कामोपभोगपरमाः regarding gratification of lust as the highest एतावत् that is all इति that निश्चिताः feeling sure;

11. Beset with immense cares ending only with death, regarding gratification of lust as the highest, and feeling sure that that is all;

Cares: as to the means of acquiring and preserving the innumerable objects of desire.

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ॥
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१२॥

आशापाशशतै: By a hundred ties of hope बद्धा: bound कामक्रोधपरायणा: given over to lust and wrath कामभोगार्थम् for sensual enjoyment अन्यायेन by unjust means अर्थसञ्चयान् hoards of wealth ईहन्ते (they) strive (to secure).

12. Bound by a hundred ties of hope, given over to lust and wrath, they strive to secure by unjust means hoards of wealth for sensual enjoyment.

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ॥
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥

अद्य Today मया by me इदम् this लब्धम् has been gained इदं this मनोरथम् desire प्राप्स्ये I shall obtain इदम् this अस्ति is पुनः again (in future) मे mine इदम् this अपि also धनम् wealth भविष्यति shall be.

13. "This today has been gained by me; this desire I shall obtain; this is mine, and this wealth also shall be mine in future.

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ॥
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥

असौ That शत्रुः enemy मया by me हतः has been slain अपरान् others च and अपि also हनिष्ये shall I slay अहम् I ईश्वरः Lord अहं I भोगी enjoyer अहं I सिद्धः (am) successful बलवान् powerful सुखी happy.

14. "That enemy has been slain by me, and others also shall I slay. I am the Lord, I enjoy, I am successful, powerful, and happy.

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ॥
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥१५॥

आढ्यः Rich अभिजनवान् well-born अस्मि I am मया to me सदृशः equal अन्यः else कः who अस्ति is यक्ष्ये I will sacrifice दास्यामि I will give मोदिष्ये I will rejoice इति thus अज्ञान-विमोहिताः deluded by ignorance.

15. "I am rich and well-born. Who else is equal to me? I will sacrifice, I will give, I will rejoice." Thus deluded by ignorance,

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥

अनेकचित्तविभ्रान्ताः Bewildered by many a fancy मोह-जालसमावृताः covered by the meshes of delusion कामभोगेषु to the gratification of lust प्रसक्ताः addicted अशुचौ foul नरके into a hell पतन्ति they fall.

16. Bewildered by many a fancy, covered by the meshes of delusion, addicted to the gratification of lust, they fall down into a foul hell.

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ॥
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१७॥

आत्मसम्भाविताः Self-conceited स्तब्धाः haughty धनमानमदान्विताः filled with the pride and intoxication of wealth ते they दम्भेन out of ostentation नामयज्ञैः sacrifices in name अविधिपूर्वकम् disregarding ordinance यजन्ते they perform;

17. Self-conceited, haughty, filled with the pride and intoxication of wealth, they perform sacrifices in name, out of ostentation, disregarding ordinance;

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।।१८।।

अहङ्कारं Egoism बलं power दर्पं insolence कामं lust क्रोधं wrath च and संश्रिताः possessed of आत्मपरदेहेषु in their own bodies and in those of others माम् Me (the Self within) प्रद्विषन्तः hating अभ्यसूयकाः (these) malignant people.

18. Possessed of egoism, power, insolence, lust, and wrath, these malignant people hate Me (the Self within) in their own bodies and those of others.

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।।१९।।

अहं I द्विषतः malicious क्रूरान् cruel नराधमान् most degraded of men अशुभान् evil-doers संसारेषु in these worlds

आसुरीषु of *Asuras* योनिषु into the wombs एव only अजस्रम् perpetually क्षिपामि (I) hurl.

19. These malicious and cruel evil-doers, most degraded of men, I hurl perpetually into the wombs of *Asuras* only, in these worlds.

Wombs of Asuras: Wombs of the most cruel beings, as tigers, snakes, etc.

Worlds: Paths of *Saṁsāra* passing through many a hell.

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥२०॥

कौन्तेय O son of Kuntī मूढा: deluded जन्मनि जन्मनि birth after birth आसुरीं *Āsurika* योनिम् wombs आपन्ना: obtaining माम् Me अप्राप्य not attaining एव still तत: than that अधमां lower गतिम् condition यान्ति (they) fall into.

20. Obtaining the *Āsurika* wombs, and deluded birth after birth, not attaining to Me, they thus fall, O son of Kuntī, into a still lower condition.

त्रिविधं नरकस्येदं द्वारं नाशनमात्मन: ॥
काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयंत्यजेत् ॥२१॥

काम: Lust क्रोध: anger तथा and लोभ: greed इदं this त्रिविधं triple नरकस्य of hell द्वारं the gate आत्मन: of the self नाशनम् destructive एतत् these त्रयं three त्यजेत् (one) should forsake.

21. Triple is this gate of hell, destructive of the self—lust, anger and greed; therefore one should forsake these three.

Destructive of the self: making the self fit for no human end whatever.

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ।।२२।।

कौन्तेय O son of Kuntī एतैः from these त्रिभिः three तमोद्वारैः gates of darkness (hell) विमुक्तः free नरः the man आत्मनः for himself श्रेयः what is good आचरति practises ततः and then परां Supreme गतिम् Goal याति goes to.

22. The man who has got beyond these three gates of darkness, O son of Kuntī, practises what is good for himself, and thus goes to the Goal Supreme.

Gates of darkness: leading to hell (*Naraka*) which is full of pain and delusion.

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।२३।।

यः Who शास्त्रविधिम् the ordinance of the *Śāstra* उत्सृज्य setting aside कामकारतः under the impulse of desire वर्तते acts सः he सिद्धिम् perfection न not अवाप्नोति attains to न nor सुखं happiness न nor परां Supreme गतिम् Goal.

23. He who, setting aside the ordinance of the *Śāstra*, acts under the impulse of desire, attains not to perfection, nor happiness, nor the Goal Supreme.

Perfection: fitness for attaining the end of man.

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।२४।।

तस्मात् So कार्याकार्यव्यवस्थितौ in ascertaining what ought to be done and what ought not to be done शास्त्रं the *Śāstra* ते thy प्रमाणं (be) authority इह here शास्त्रविधानोक्तं what is said in the ordinance of the *Śāstra* ज्ञात्वा having known कर्म action कर्तुम् to do अर्हसि thou shouldst.

24. So let the *Śāstra* be thy authority in ascertaining what ought to be done and what ought not to be done. Having known what is said in the ordinance of the *Śāstra*, thou shouldst act here.

Here: in this world.

इति दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः ।।

The end of the sixteenth chapter, designated, *The Classification of the Divine and the Non-divine Attributes.*

।। सप्तदशोऽध्यायः ।।

SEVENTEENTH CHAPTER

अर्जुन उवाच ।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ।।१।।

अर्जुनः Arjuna उवाच said:

कृष्ण O Kṛṣṇa ये who शास्त्रविधिम् the ordinance of the *Śāstra* उत्सृज्य setting aside श्रद्धया with *Śraddhā* तु but अन्विताः endued यजन्ते perform sacrifice तेषां their निष्ठा condition का what सत्त्वम् *Sattva* रजः *Rajaṣ* आहो or तमः *Tamas*.

Arjuna said:

1. Those who, setting aside the ordinance of the *Śāstra*, perform sacrifice with *Śraddhā*, what is their condition, O Kṛṣṇa? (Is it) *Sattva, Rajas* or *Tamas*?

Setting . . . Śraddhā: not that they believe the ordinance of the *Śāstra* to be false, but out of laziness or because of the difficulty in adhering to them strictly, they let them alone and worship the gods, endued with *Śraddhā*.

श्रीभगवानुवाच ।
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ।।२।।

श्रीभगवान् The Blessed Lord उवाच said:

देहिनां Of the embodied सात्त्विकी the *Sāttvika* राजसी the *Rājasika* तामसी the *Tāmasika* च and इति thus त्रिविधा threefold एव indeed श्रद्धा the *Śraddhā* भवति is सा which स्वभावजा (is) inherent in (their) nature तां of it शृणु hear (thou).

The Blessed Lord said:

2. Threefold is the *Śraddhā* of the embodied, which is inherent in their nature—the *Sāttvika*, the *Rājasika* and the *Tāmasika*. Do thou hear of it.

Inherent . . . nature: born of their past *Saṁskāras*.
It: the threefold *Śraddhā*.

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।।३।।

भारत O descendant of Bharata सर्वस्य of each श्रद्धा *Śraddhā* सत्त्वानुरूपा according to his natural disposition भवति is अयं the पुरुषः man श्रद्धामयः consists of (his) *Śraddhā* यः he यच्छ्रद्धः what (his) *Śraddhā* is सः he एव verily सः that (is).

3. The *Śraddhā* of each is according to his natural disposition, O descendant of Bharata. The man consists of his *Śraddhā*; he verily is what his *Śraddhā* is.

Natural disposition: the specific tendencies or *Saṁskāras*.

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ।।४।।

सात्त्विकाः *Sāttvika* men देवान् the *Devas* यजन्ते worship राजसाः the *Rājasika* यक्षरक्षांसि the *Yakṣas* and the *Rākṣasas* अन्ये the others तामसाः the *Tāmasika* जनाः men प्रेतान् the *Pretas* भूतगणान् the hosts of *Bhūtas* च and यजन्ते worship.

4. *Sāttvika* men worship the *Devas*; *Rājasika*, the *Yakṣas* and the *Rākṣasas*; the others — the *Tāmasika* men — the *Pretas* and the hosts of *Bhūtas*.

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ।।५।।
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ।।६।।

दम्भाहङ्कारसंयुक्ताः Given to ostentation and egoism कामरागबलान्विताः endowed with the power of lust and

attachment ये who अचेतस: senseless जना: men शरीरस्थं in the body भूतग्रामम् all the organs अन्तःशरीरस्थं that dwell in the body within मां Me च and कर्शयन्त: torturing अशास्त्रविहितं not enjoined by the *Śāstras* घोरं severe तप: austerity तप्यन्ते practise तान् them आसुरनिश्चयान् to be of *Āsurika* resolve विद्धि know.

5-6. Those men who practise severe austerities not enjoined by the *Śāstras*, given to ostentation and egoism, endowed with the power of lust and attachment, torture, senseless as they are, all the organs in the body, and Me dwelling in the body within; know them to be of *Āsurika* resolve.

Austerities: which cause pain to himself and to other living beings.

Possessed . . . attachment: may also be interpreted as, "possessed of lust, attachment and power".

All the organs of the body: the aggregate of all the elements composing the body.

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु ।।७।।

सर्वस्य By each of them अपि also आहार: food तु indeed त्रिविध: threefold प्रिय: liked भवति is तथा as also यज्ञ: *Yajña* तप: austerity दानं almsgiving च and तेषां their इमं this भेदम् distinction श्रृणु do thou hear.

7. The food also which is liked by each of them is threefold, as also *Yajña*, austerity, and almsgiving. Do thou hear this, their distinction.

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः ।।८।।

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः Those which augment आयुः vitality सत्त्वम् energy बलम् strength आरोग्यम् health सुखम् cheerfulness and प्रीतिः appetite रस्याः which are savoury स्निग्धाः oleaginous स्थिराः substantial हृद्याः agreeable आहाराः the foods सात्त्विकप्रियाः (are) liked by the *Sāttvika*.

8. The foods which augment vitality, energy, strength, health, cheerfulness, and appetite, which are savoury and oleaginous, substantial and agreeable, are liked by the *Sāttvika*.

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ।।९।।

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः Those that are कटुः bitter अम्लः sour लवणः saline अत्युष्णः excessively hot तीक्ष्णः pungent रूक्षः dry and विदाहिनः burning दुःखशोकामयप्रदाः are productive of pain, grief, and disease आहाराः the foods राजसस्य by the *Rājasika* इष्टाः are liked.

9. The foods that are bitter, sour, saline, excessively hot, pungent, dry, and burning, are liked by the *Rājasika*, and are productive of pain, grief, and disease.

Excessively: this word should be construed with each of the seven; thus, excessively bitter, excessively sour, and so on.

यातयामं गतरसं पूति पर्युषितं च यत् ।।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।।१०।।

यत् Which यातयामं (is) stale गतरसं is tasteless पूति stinking पर्युषितं cooked overnight उच्छिष्टम् refuse अमेध्यं impure च and भोजनं the food तामसप्रियम् liked by the *Tāmasika*.

10. That which is stale, tasteless, stinking, cooked overnight, refuse, and impure, is the food liked by the *Tāmasika*.

Stale: *Yātayāmam*—lit., cooked three hours ago.
Refuse: left on the plate after a meal.

अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ।।११।।

अफलाकांक्षिभिः By men desiring no fruit यष्टव्यम् to be performed for its own sake एव only इति as मनः (their) mind समाधाय fixing विधिदृष्टः as enjoined by ordinance यः which यज्ञः *Yajña* इज्यते is performed सः that सात्त्विकः is *Sāttvika*.

11. That *Yajña* is *Sāttvika* which is performed by men desiring no fruit, as enjoined by ordinance, with their mind fixed on the *Yajña* only, for its own sake.

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ॥
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥

फलं Fruit अभिसन्धाय seeking for तु but दम्भार्थम् for ostentation अपि also एव indeed च and यत् which इज्यते is performed भरतश्रेष्ठ O best of the Bhāratas तं that यज्ञं *Yajña* राजसम् *Rājasika* विद्धि know (it to be)

12. That which is performed, O best of the Bhāratas, seeking for fruit and for ostentation, know it to be a *Rājasika Yajña*.

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ॥
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥

विधिहीनम् Without keeping to ordinance असृष्टान्नं in which no food is distributed मन्त्रहीनम् which is devoid of *Mantras* अदक्षिणम् whith is devoid of gifts श्रद्धाविरहितं devoid of *Śraddhā* यज्ञं *Yajña* तामसं *Tāmasika* परिचक्षते is said to be.

13. The *Yajña* performed without heed to ordinance, in which no food is distributed,

which is devoid of *Mantras*, gifts, and *Śraddhā*, is said to be *Tāmasika*.

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ॥
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥

देवद्विजगुरुप्राज्ञपूजनं Worship of the *Devas*, the twice-born, the *Gurus*, and the wise शौचम् purity आर्जवम् straightforwardness ब्रह्मचर्यम् continence अहिंसा non-injury च and शारीरं of the body तप: the austerity उच्यते is called.

14. Worship of the *Devas*, the twice-born, the *Gurus*, and the wise; purity, straightforwardness, continence, and non-injury are called the austerity of the body.

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥

अनुद्वेगकरं Causing no vexation सत्यं true प्रियहितं agreeable and beneficial च as also यत् which वाक्यं speech स्वाध्यायाभ्यसनं regular study of Vedas च एव and also वाङ्मयं of speech तप: the austerity उच्यते is said (to form)

15. Speech which causes no vexation, and is true, as also agreeable and beneficial and regular study of the Vedas — these are said to form the austerity of speech.

Speech, to be an austerity, must form an invariable combination of all the four attributes mentioned in the *Śloka*; if it lacks in one or other of them, it will no longer be an austerity of speech.

मन:प्रसाद: सौम्यत्वं मौनमात्मविनिग्रह: ।।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ।।१६।।

मन:प्रसाद: Serenity of mind सौम्यत्वं kindliness मौनम् silence आत्मविनिग्रह: self-control भावसंशुद्धि: honesty of motive इति एतत् this मानसम् mental तप: the austerity उच्यते is called.

16. Serenity of mind, kindliness, silence, self-control, honesty of motive — this is called the mental austerity.

Silence: *Maunam*—is the result of the control of thought so far as it concerns speech. Or it may mean, the condition of the *Muni*, i.e., practice of meditation.

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरै: ।।
अफलाकांक्षिभिर्युक्तै: सात्त्विकं परिचक्षते ।।१७।।

अफलाकांक्षिभि: Desiring no fruit युक्तै: steadfast नरै: by men परया great श्रद्धया with *Śraddhā* तप्तं practised तत् that त्रिविधं threefold तप: austerity सात्त्विकं *Sāttvika* परिचक्षते (sages) call.

17. This threefold austerity practised by steadfast men, with great *Śraddhā*, desiring no fruit, is said to be *Sāttvika*.

Steadfast: unaffected in success and failure.

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ॥
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥

सत्कारमानपूजार्थं With the object of gaining welcome, honour, and worship दम्भेन with ostentation च एव and यत् which तपः austerity क्रियते is practised इह here चलम् unstable अध्रुवम् transitory तत् that राजसं *Rājasika* प्रोक्तं is said (to be).

18. That austerity which is practised with the object of gaining welcome, honour, and worship, and with ostentation, is here said to be *Rājasika*, unstable, and transitory.

With ostentation: for mere show, hypocritically, with no sincere belief.

Here: is explained also in the sense of "of this world", i.e. yielding fruit only in this world.

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ॥
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥

मूढग्राहेण Out of a foolish notion आत्मनः of self पीडया with torture परस्य of another उत्सादनार्थं for the purpose of ruining वा or यत् which तपः austerity क्रियते is practised तत् that तामसम् *Tāmasika* उदाहृतम् is declared (to be).

19. That austerity which is practised out of a foolish notion, with self-torture or for the purpose of ruining another, is declared to be *Tāmasika*.

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ॥
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥२०॥

देशे In a fit place काले in a fit time च and पात्रे to a worthy person च and दातव्यम् to give is right इति with this idea अनुपकारिणे to one who does no service (in return) यत् which दानं gift दीयते is given तत् that दानं gift सात्त्विकं *Sāttvika* स्मृतम् is held to be.

20. "To give is right"—gift given with this idea, to one who does no service in return, in a fit place and to a worthy person, that gift is held to be *Sāttvika*.

Who . . . return: one who cannot, or who though able is not expceted to return the good.

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ॥
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥

यत् What तु and प्रत्युपकारार्थं with a view to receiving in return फलम् च and the fruit उद्दिश्य looking for वा or पुनः again परिक्लिष्टं reluctantly दीयते is given तत् that दानं gift राजसं *Rājasika* स्मृतम् is held to be.

21. And what is given with a view to receiving in return, or looking for the fruit, or again reluctantly, that gift is held to be *Rājasika*.

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ।।२२।।

अदेशकाले At the wrong place or time अपात्रेभ्यः च and to unworthy persons असत्कृतम् without regard अवज्ञातं with disdain यत् that दानम् gift दीयते is given तत् that तामसम् *Tāmasika* उदाहृतम् is declared to be.

22. The gift that is given at the wrong place or time, to unworthy persons, without regard or with disdain, that is declared to be *Tāmasika*.

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ।।२३।।

ॐ *Om* तत् *Tat* सत् *Sat* इति this ब्रह्मणः of Brahman त्रिविधः triple निर्देशः designation स्मृतः has been declared तेन by that ब्राह्मणाः the *Brāhmaṇas* च and वेदाः the Vedas च and यज्ञाः the *Yajñas* पुरा of old विहिताः were made.

23. "*Om, Tat, Sat*": this has been declared to be the triple designation of Brahman. By that were made of old the *Brāhmaṇas*, the Vedas, and the *Yajñas*.

Om, Tat, Sat: *Om* is the principal name of the Lord, because it means all that is manifest and the beyond. It also means "Yes". *Tat* means "That"; the Indefinable, that which can only be described indirectly as "That which". *Sat* means Reality; which is ever permanent in one mode of being.

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ।।२४।।

तस्मात् Therefore ओम् *Om* इति उदाहृत्य uttering ब्रह्मवादिनाम् of the followers of the Vedas विधानोक्ताः as enjoined in the ordinances यज्ञदानतपःक्रियाः the acts of sacrifice, gift, and austerity सततं always प्रवर्तन्ते begun.

24. Therefore, uttering "*Om*", are the acts of sacrifice, gift, and austerity as enjoined in the ordinances, always begun by the followers of the Vedas.

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः।।२५।।

तत् *Tat* इति thus (uttering) फलं the fruit अनभिसन्धाय without aiming at मोक्षकांक्षिभिः by seekers of *Mokṣa* विविधाः various यज्ञतपःक्रियाः acts of *Yajña* and austerity दानक्रियाः acts of gift च and क्रियन्ते are performed.

25. Uttering "*Tat*", without aiming at fruits, are the various acts of *Yajña*, austerity, and gift performed by the seekers of *Mokṣa*.

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ।।२६।।

पार्थ O Pārtha सद्भावे in the sense of reality साधुभावे in the sense of goodness च and सत् *Sat* इति as एतत् this प्रयुज्यते is used तथा so long प्रशस्ते auspicious कर्मणि in (the sense of) an act च and सत् *Sat* शब्द: the word युज्यते is used.

26. The word "*Sat*" is used in the sense of reality and of goodness; and so also, O Pārtha, the word "*Sat*" is used in the sense of an auspicious act.

यज्ञे तपसि दाने च स्थिति: सदिति चोच्यते ।।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ।।२७।।

यज्ञे In *Yajña* तपसि in austerity दाने in gift च and स्थिति: steadiness सत् *Sat* इति so उच्यते is called च also तदर्थीयं in connection with these, or, for the sake of the Lord कर्म action च एव as also सत् *Sat* इति एव so अभिधीयते is called.

27. Steadiness in *Yajña*, austerity, and gift is also called "*Sat*": as also action in connection with these (or, action for the sake of the Lord) is called "*Sat*".

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ।।२८।।

अश्रद्धया Without *Śraddhā* हुतं is sacrificed दत्तं given तप्तं is practised तपः ansterity च and यत् whatever कृतं peıformed असत् *Asat* इति so उच्यते is called पार्थ O Pārtha तत् it न च neither प्रेत्य hereafter (after death) नो nor इह here.

28. Whatever is sacrificed, given, or performed and whatever austerity is practised without *Śraddhā*, it is called *Asat*, O Pārtha; it is naught here or hereafter.

It is naught here or hereafter: Though costing much trouble it is of no use here as it is not acceptable to the wise ones, nor can it produce any effect conducive to good hereafter.

इति श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥

The end of the seventeenth chapter, designated, *The Enquiry into the Threefold Śraddhā*.

॥ अष्टादशोऽध्यायः ॥

EIGHTEENTH CHAPTER

अर्जुन उवाच ।

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ॥
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१॥

अर्जुनः Arjuna उवाच said:

हृषीकेश O Hṛṣīkeśa महाबाहो O mighty-armed केशिनिषूदन O Slayer of Keśi संन्यासस्य of *Sannyāsa* त्यागस्य of *Tyāga* च as also पृथक् severally तत्त्वम् truth वेदितुम् to know इच्छामि I desire.

Arjuna said:

1. I desire to know severally, O mighty-armed, the truth of *Sannyāsa*, O *Hṛṣīkeśa*, as also of *Tyāga*, O slayer of Keśi.

Sannyāsa and *Tyāga* both mean renunciation.
Keśi: was an Asura.

श्रीभगवानुवाच ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ॥
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥

श्रीभगवान् The Blessed Lord उवाच said:

कवय: The sages काम्यानां *Kāmya* कर्मणां of actions न्यासं the renunciation संन्यासं (as) *Sannyāsa* विदु: understand विचक्षणा: the wise सर्वकर्मफलत्यागं the abandonment of the fruit of all works त्यागं (as) *Tyāga* प्राहु: declare.

The Blessed Lord said:

2. The renunciation of *Kāmya* actions, the sages understand as *Sannyāsa*; the wise declare the abandonment of the fruit of all works as *Tyāga*.

Kāmya: which are accompanied with a desire for fruits.

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिण: ।।
यज्ञदानतप:कर्म न त्याज्यमिति चापरे ।।३।।

एके Some मनीषिण: philosophers कर्म (all) actions दोषवत् as an evil इति that त्याज्यं should be relinquished प्राहु: declare अपरे others च whilst यज्ञदानतप:कर्म the work of *Yajña*, gift, and austerity न not त्याज्यम् should be relinquished इति that.

3. Some philosophers declare that all actions should be relinquished as an evil, whilst others (say) that the work of *Yajña*, gift, and austerity should not be relinquished.

निश्चयं श्रृणु मे तत्र त्यागे भरतसत्तम ॥
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥४॥

भरतसत्तम O best of the Bhāratas पुरुषव्याघ्र O tiger among men तत्र about that त्यागे in relinquishment मे from Me निश्चयं the final truth श्रृणु hear त्यागः relinquishment हि for त्रिविधः of three kinds सम्प्रकीर्तितः has been declared (to be).

4. Hear from Me the final truth about relinquishment, O best of the Bhāratas. For relinquishment has been declared to be of three kinds, O tiger among men.

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ॥
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥

यज्ञदानतपःकर्म The work of *Yajña*, gift, and austerity न not त्याज्यं should be relinquished तत् it कार्यम् should be performed एव indeed यज्ञः *Yajña* दानं gift तपः austerity च and एव indeed मनीषिणाम् to the wise पावनानि are purifying.

5. The work of *Yajña*, gift, and austerity should not be relinquished, but it should indeed be performed; (for) *Yajña*, gift, and austerity are purifying to the wise.

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ॥
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥

पार्थ O Pārtha एतानि these कर्माणि works अपि even तु but सङ्गं attachment फलानि the fruits च and त्यक्त्वा leaving कर्तव्यानि should be performed इति such मे My निश्चितं certain उत्तमम् best मतम् conviction.

6. But even these works, O Pārtha should be performed, leaving attachment and the fruits; such is My best and certain conviction.

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ॥
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥७॥

नियतस्य Obligatory कर्मणः of action तु but संन्यासः the renunciation न not उपपद्यते is proper मोहात् from delusion तस्य of the same परित्यागः abandonment तामसः *Tāmasika* परिकीर्तितः is declared.

7. But the renunciation of obligatory action is not proper. Abandonment of the same from delusion is declared to be *Tāmasika.*

Since it is purifying in the case of the ignorant.

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ॥
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥

दुःखम् (It is) painful इति because एव only कायक्लेशभयात् from fear of bodily trouble यत् which कर्म action त्यजेत् relinquishes सः he राजसं *Rājasika* त्यागं relinquishment कृत्वा performing त्यागफलं the fruit of relinquishment न not एव लभेत् obtains.

8. He who from fear of bodily trouble relinquishes action, because it is painful, thus performing a *Rājasika* relinquishment, he obtains not the fruit thereof.

Fruit: i.e., *Mokṣa*, which comes out of the renunciation of all actions accompanied with wisdom.

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥९॥

अर्जुन O Arjuna सङ्गं attachment फलं fruit च एव and त्यक्त्वा leaving कार्यम् it ought to be done इति because एव only यत् which नियतं obligatory कर्म action क्रियते is performed सः such त्यागः relinquishment सात्त्विकः *Sāttvika* मतः is regarded.

9. When obligatory work is performed, O Arjuna, only because it ought to be done, leaving attachment and fruit, such relinquishment is regarded as *Sāttvika*.

न द्वेष्टचकुशलं कर्म कुशले नानुषज्जते ।।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ।।१०।।

सत्त्वसमाविष्टः Endued with *Sattva* मेधावी with a steady understanding छिन्नसंशयः with his doubts dispelled त्यागी the relinquisher अकुशलं disagreeable कर्म action न not द्वेष्टि hates कुशले to an agreeable one न nor अनुषज्जते is attached.

10. The relinquisher endued with *Sattva* and a steady understanding and with his doubts dispelled, hates not a disagreeable work nor is attached to an agreeable one.

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ।।११।।

देहभृता by an embodied being अशेषतः entirely कर्माणि actions त्यक्तुं to relinquish न not हि indeed शक्यं can be यः who तु but कर्मफलत्यागी relinquisher of the fruits of action सः he त्यागी relinquisher इति thus अभिधीयते is called.

11. Actions cannot be entirely relinquished by an embodied being, but he who relinquishes the fruits of action is called a relinquisher.

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ।।१२।।

अत्यागिनां To non-relinquishers प्रेत्य after death अनिष्टम् disagreeable इष्टं agreeable मिश्रं mixed च and त्रिविधं threefold कर्मण: of action फलम् fruit भवति accrues तु but संन्यासिनां to relinquishers क्वचित् ever न not.

12. The threefold fruit of action — disagreeable, agreeable, and mixed — accrues to non-relinquishers after death, but never to relinquishers.

पञ्चैतानि महाबाहो कारणानि निबोध मे ॥
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३॥

महाबाहो O mighty-armed सांख्ये in the wisdom कृतान्ते which is the end of all action सर्वकर्मणाम् of all works सिद्धये for the accomplishment प्रोक्तानि as declared एतानि these पञ्च five कारणानि causes मे from Me निबोध learn.

13. Learn from Me, O mighty-armed, these five causes for the accomplishment of all works as declared in the wisdom which is the end of all action:

Wisdom: *Sāṅkhya*—literally, in which all the things that are to be known are expounded, therefore, the highest wisdom.

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ॥
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥१४॥

अधिष्ठानं The body तथा also कर्ता the agent पृथग्विधम् various करणं the senses विविधाः of a manifold kind पृथक् different चेष्टाः functions अत्र of these पञ्चमम् the fifth दैवं the presiding divinity च एव and also.

14. The body, the agent, the various senses, the different functions of a manifold kind, and the presiding divinity, the fifth of these;

Presiding divinity: Each of the senses has its god who presides over it, and by whose aid it discharges its own functions; e.g., *Āditya* (the Sun) is the presiding divinity of the eye, by whose aid it sees and acts; and so on with the other senses.

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

नरः A man शरीरवाङ्मनोभिः by (this) body, speech, and mind यत् whatever न्याय्यं right वा or विपरीतं the reverse कर्म action प्रारभते performs एते these पञ्च five तस्य its हेतवः causes.

15. Whatever action a man performs by his body, speech, and mind—whether right or the reverse—these five are its causes.

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ॥
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥

एवं Thus सति being तत्र there (the case) केवलं the Absolute आत्मानं the Self तु verily अकृतबुद्धित्वात् through a non-purified understanding यः who कर्तारम् as the agent पश्यति looks upon सः he दुर्मतिः of perverted mind न not पश्यति sees.

16. Such being the case, he who through a non-purified understanding looks upon his Self, the Absolute, as the agent — he of perverted mind sees not.

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ।।१७।।

यस्य Whose अहंकृतः of egoism भावः the notion न not यस्य whose बुद्धिः intelligence न not लिप्यते is affected सः he इमान् these लोकान् people हत्वा killing अपि though न not हन्ति kills न nor निबध्यते is bound.

17. He who is free from the notion of egoism, whose intelligence is not affected (by good or evil), though he kills these people, he kills not, nor is bound (by the action).

He whose self-consciousness, by the force of long, strenuous, and properly-trained self-concentration, is ever identified with Brahman, and not with the five causes of action as mentioned in *Śloka* 14—he whose self-consciousness never mistakes itself for the body, mind, and the like, even when performing physical acts – he is ever free from the taint of action.

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ।।१८।।

ज्ञानं Knowledge ज्ञेयं the known परिज्ञाता the knower त्रिविधा threefold कर्मचोदना the cause of action करणं the instrument कर्म the object कर्ता the agent इति the त्रिविधः threefold कर्मसंग्रहः the basis of action.

18. Knowledge, the known and the knower form the threefold cause of action. The instrument, the object, and the agent are the threefold basis of action.

Basis: because the threefold action inheres in these three.

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ।।१९।।

गुणसंख्याने In the (science of) enumeration of the *Guṇas* (Sāṅkhya philosophy) ज्ञानं knowledge कर्म action च and कर्ता agent च and गुणभेदतः from the distinction of *Guṇas* त्रिधा of three kinds एव only प्रोच्यते are declared (to be) तानि them अपि also यथावत् duly शृणु hear.

19. Knowledge, action and agent are declared in the Sāṅkhya philosophy to be of three kinds only, from the distinction of *Guṇas*: hear them also duly.

Sāṅkhya: the Science of the *Guṇas* by Kapila. Though the Sāṅkhya view is in conflict with the supreme Truth of Vedānta—the oneness or non-duality of Brahman—yet the former view is given here, because it is an authority on the science of *Guṇas*.

Duly: described according to the science, according to reason.

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥२०॥

येन By which विभक्तेषु in the separate सर्वभूतेषु (in) all beings अविभक्तं inseparate एकं the one अव्ययम् indestructible भावम् Substance ईक्षते (one) sees तत् that ज्ञानं knowledge सात्त्विकम् to be *Sāttvika* विद्धि know (thou).

20. That by which the one indestructible Substance is seen in all beings, inseparate in the separated, know that knowledge to be *Sāttvika*.

Inseparate: undifferentiated; permeating all.

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥२१॥

पृथक्त्वेन As different from one another तु but यत् which ज्ञानं knowledge सर्वेषु all भूतेषु in beings पृथग्विधान् of distinct kinds नानाभावान् various entities वेत्ति knows तत् that ज्ञानं knowledge राजसम् as *Rājasika* विद्धि know (thou).

21. But the knowledge which sees in all beings various entities of distinct kinds as different from one another, know thou that knowledge as *Rājasika.*

Entities: Souls.

Different from one another: Different in different bodies.

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ॥
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥२२॥

यत् Which तु but एकस्मिन् one single कार्ये to effect कृत्स्नवत् as if it were the whole सक्तम् confined अहैतुकम् without reason अतत्त्वार्थवत् without foundation in truth अल्पं trivial च and तत् that तामसम् *Tāmasika* उदाहृतम् is declared.

22. Whilst that which is confined to one single effect as if it were the whole, without reason, without foundation in truth, and trivial—that is declared to be *Tāmasika.*

One single effect: such as the body—thinking it to be the Self.

नियतं सङ्गरहितमरागद्वेषतः कृतम् ॥
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥२३॥

अफलप्रेप्सुना By one not desirous of the fruit नियतं ordained सङ्गरहितम् free from attachment अरागद्वेषतः with-

out love or hatred कृतम् done यत् which कर्म action तत् that सात्त्विकम् *Sāttvika* उच्यते is declared.

23. An ordained action done without love or hatred by one not desirous of the fruit and free from attachment, is declared to be *Sāttvika*.

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ॥
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥

कामेप्सुना By one desiring desires साहंकारेण with self-conceit वा or बहुलायासं with much effort यत् which तु but पुनः again कर्म the action क्रियते is performed तत् that राजसम् *Rājasika* उदाहृतम् is declared.

24. But the action which is performed desiring desires, or with self-conceit and with much effort, is declared to be *Rājasika*.

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ॥
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥

अनुबन्धं The consequence क्षयं loss (of power and wealth) हिंसाम् injury (to others) पौरुषम् (one's own) ability च and अनपेक्ष्य without heeding मोहात् through delusion यत् which कर्म action आरभ्यते is undertaken तत् that तामसम् *Tāmasika* उच्यते is declared.

25. That action is declared to be *Tāmasika* which is undertaken through delusion, without heed to the consequence, loss (of power and wealth), injury (to others), and (one's own) ability.

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।।
सिद्धयसिद्धयोर्निर्विकारः कर्ता सात्त्विक उच्यते ।।२६।।

